ऋणमोचनस्तोत्रम्

देवताकार्यसिद्ध्यर्थं सभास्तम्भसमुद्भवम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ १ ॥

लक्ष्म्यालिङ्गितवामाङ्गं भक्तानां वरदायकम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ २ ॥

आन्त्रमालाधरं शङ्खचक्राब्जायुधधारिणम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ३ ॥

स्मरणात्सर्वपापघ्नं कद्रूजविषनाशनम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ४ ॥

सिंहनादेन महता दिग्दन्तिभयनाशनम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ५ ॥

प्रह्लादवरदं श्रीशं दैत्येश्वरविदारणम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ६ ॥

क्रूरग्रहैः पीडितानां भक्तानामभयप्रदम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ७ ॥

वेदवेदान्तयज्ञेशं ब्रह्मरुद्रादिवन्दितम् ।
श्रीनृसिंह महावीरं नमामि ऋणमुक्तये ॥ ८ ॥

य इदं पठते नित्यमृणमोचनसंज्ञितम् ।
अनृणीं जायते सद्यो धनं शीघ्रमवाप्नुयात् ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

ऋणमोचनस्तोत्रं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु